IJNRD.ORG ISSN : 2456-4184
INTERNATIONAL JOURNAL OF NOVEL RESEARCH AND DEVELOPMENT (IJNRD) | IJNRD.ORG
An International Open Access, Peer-reviewed, Refereed Journal

# जनलक् दर्शनसमीक्षणम्

## Review of Jhon Luck's opinion

कूटशब्दाः- लक्, अनुभववादः, सहजातप्रत्ययः, भाषाविश्लेषणम्, ज्ञानम्, सीमानिर्धारणम्

**शोधसारः-**

मतिरेव मानवेषु कापि दिव्या आध्यात्मिकी शक्तिः, सा हि व्यक्तमव्यक्तं च सकलं वस्तुजातं स्वयमेव ज्ञानेन्द्रियमात्रसहायेन हस्तामलकवत्परीक्षते। सर्वदा निर्मला हि मतिः शुद्धस्फटिकनिभोज्ज्वला यदा प्रकाशते तदा सर्वेन्द्रियेषु प्रकाश उपजायते। तस्मात् व्यक्तविषयाणां निर्भान्तं ज्ञानं भवति तथा आध्यात्मिकानाञ्च तत्त्वानां विवेको जायते। अतएव विशुद्धा मतिरेव ज्ञानं प्रशिक्षयति तस्मात् मतिप्रधानमिदं दर्शनशास्त्रम् प्रसिद्धम्।

तत्र मतमतान्तरप्रचुरतायां कस्यचिदेकस्य सर्वोत्तमस्य परमतत्त्वस्य निर्धारणं करणीयम्। केषांचिन्मते तत्परमतत्त्वमाधिभौतिकं परेषां च मते तदाध्यात्मिकम्। अन्यतरेषां मते तु तदुभयात्मकं वरीवर्ति। प्राच्या मननशीलाः प्रायशः आध्यात्मिकं पाश्चात्याश्च आधिभौतिकवादिनः आहुः। एषु पाश्चात्येषु जनलक् दर्शनसारं संप्रति प्रस्तुयते।

**विषयोपक्रमः-**

अनुभववादस्य आविष्कर्ता जनलक् दर्शनं तावत् वस्तूनां वास्तविकज्ञाननिर्धारणक्षेत्रम्।[1] बुद्धेः Innate Ideas मूलतत्त्वस्य Principles विचारोऽस्मिन् सम्पद्यते।[2] जनलक् 1632 ख्रीष्टाब्दे अगष्टमासस्य ऊनत्रिंशत् (29/08/1632) तारिकायां इंलण्डदेशस्य 'समरसेट' स्थाने धर्मतत्वविचारणाय समजायत। अस्य सर्वा शिक्षादीक्षा अक्सफोड विश्वविद्यालये समभूत्। स्वकीयवृत्तौ यद्यपि अयं चिकित्सक आसीत् तथापि राजनीतौ अस्य अभीप्सा बलवत्तरा श्रूयते। सहजातप्रत्ययवादस्य खण्डनकर्ता अयं दार्शनिको लक् अत्यन्तः रुग्ण आसीत्। परिशेषे चिकित्सकरूपेण स्वकीयकार्यं सफलतया सह परिचालयितुमसमर्थः सन् राजनीतिक्षेत्रे मनोनिवेशश्चकार। त्रीणि वर्षाणि यावत् वर्लिनराष्ट्रदूतस्य सचिवो बभूव पश्चात् 'साफटसवेरीर' नामकेन केनचित्महापुरुषेण संयोज्य प्रांसदेशं गतवान्। तत्रापि कियद्वर्षाणि व्यतीत्य हलाण्डमागतवान्। हलाण्डात्पुनः इंलण्डं प्रत्यागतवान्। 28/10/1704 ख्रीष्टाब्दे रक्तहीनता

रोगेणाक्रान्तः पञ्चत्वमवाप । अस्य महानुभावस्य पिता John जन् तथा माता च आगनेस किनि AgnesKeene आस्ताम् ।[3]

**कृतयः**- List of major Works

जनलक् बहुशास्त्रस्य रचयिता महान् दार्शनिकः, महान् वैज्ञानिकः, महान् चिकित्सकश्च श्रूयते । तल्लिखितग्रन्थावलिषु पञ्चग्रन्थाः अतीव प्रसिद्धाः सन्ति । तानि पुस्तकानि वक्षमाणानि-

1. An Essay on civil Government असामयिक शासनव्यवस्था प्रबन्धः

2. Letters on Education शिक्षापत्रावली

3. Essay on the Human Understanding मानवीयबुद्धिविमर्शप्रबन्धः

4. The Reasonableness of Christianity ख्रीष्टधर्मस्य युक्तिसत्ता

5. Letters toToleration परस्पारिक-सहिष्णुता सम्बन्धीय-पत्रावल्यः, प्रबन्धाः वा स्वकीयां महत्वाकांक्षां प्रतिपादयन्ति[4] स्म ।

लक् आधुनिक-मनोविज्ञानस्य उद्भावनकर्ता मन्यते ।[5] तन्नये मनसः स्वरूपव्याख्याने नास्मत्प्रवृत्तिर्नापि मनःसंयोगशारीरकव्यापारचिन्तने, अपितु उद्देश्यसाधनार्थं हि अस्माभिः ज्ञानप्रत्ययात्मिका वृत्तिर्विषये अवश्यमेव आलोचना कर्त्तव्या इति तज्ज्ञाः वदन्ति ।

ज्ञानस्योत्पत्तिर्विकाशविषये इदं वक्तव्यम् । मनः स्वच्छम्, तस्मिननुभवात् प्रत्ययः। कोऽसौ प्रत्ययः ? चिन्तनप्रक्रियायां यस्याविर्भावो जातः स एव प्रत्यय इति ।

ज्ञानस्य मूलमाविष्कर्तुं अस्य महानुभावस्य चेष्टा तस्मिन् दर्शने किदृशी प्रतिफलिता इत्यनुसन्धाने प्रत्यययाणां मूलं सर्वादौ अनुसन्धेयम् । डेकार्टनये किमपि ज्ञानं सहोत्पन्नं भवति । किन्तु लक् सहजातप्रत्ययं नांगीकरोति । सहजातप्रत्ययं किमपि नास्ति । लक् न्नये इन्द्रियं मनः शंसनाग्राहि । शंसनं नाम मनोव्यापारसहितं प्रेक्षणम् । तदाश्रिता मतिः । शंसनप्रेक्षणानामेव योगमात्रं धीः करोति। नेतरद् । शरीरान्तर्गतं चित्तं शरीराद् बहिः मनश्च शरीराद् भिन्नम् । मनः इन्द्रियाणां प्रधानतमम् । निद्रावस्थायामपि मनो जागर्त्ति । स्वप्नादिकल्पनां च करोति पश्यत्यपि । शंसनमपि वस्तूनां गुणेषु निर्भरशीलम् । यतः तत्तद् गुणानां रूपं बुद्धिगोचरं करोति । यदा वस्तुगुणो रूपं तदा चक्षुः तद्गुणं गृह्णाति । यदि वस्तुगुणो रसस्तदा रसनेन्द्रियं तद् गृणाति । यदि वस्तुगुणो शब्दस्तदा श्रवणेन्द्रियं तद् गृह्णाति । यदि वस्तुगुणः स्पर्शस्तदा त्वगिन्द्रियं तद् गृह्णाति । यदि वस्तुगुणो गन्धस्तदा नासिकेन्द्रियं तद्गुणस्य ग्रहणकर्ता मन्यते । नान्यथा । एतेषामिन्द्रियाणां शक्तिरपि विद्यते।[6] एतेषां नये आकार-

आयाम-विस्तार-गति-संख्या-कठोरतागुणाश्च मुख्यरूपेण विद्यन्ते। रूपरसादयः गौणाः अप्रधानाः। ये केचिदान्तराः भावास्ते बाह्यप्रतिविम्बिताः। तस्मात् ध्यानतत्त्वस्वप्नादिविचाराः बाह्याः न आच्यन्तरा मन्यन्ते। न हि मनुष्याणां बुद्धिरतः परं जानाति। एतेषां ज्ञानानां पारं बुद्धिरपि गन्तुमक्षमा। आत्मतत्त्वस्य विषयेऽस्य कथापि प्रमाणतः किमपि वक्तुं न शक्यते। यच्चोक्तम्-

अहमस्मीति जानीयादधिकादधिकं नरः।

ईश्वरं चापि जानीयादहंकारस्य कारणात्॥[7]

**<u>सहजात-प्रत्ययवाद-खण्डनम्</u>**

सह जायते इति सहजातः। सहजातश्च प्रत्ययः सहजातप्रत्ययः कर्मधारयः। न ते प्रत्ययाः सहजन्मा भवन्ति। अनुभवात् हि प्रत्ययाः जायन्ते। तस्मात् असहजात-प्रत्ययवादोऽत्र स्वीकृतः। अनुभवो द्विप्रकारकः। एकः संवेदनजन्य अपरो विमर्शात्मकः स्वचिन्तनपरः। इन्द्रियजन्यं संवेदनम् बाह्यविषयकम्। संवेदनेन मनसि संवेदनगुणोत्पत्तिः। विमर्शो नाम अन्तःकरणक्रियारूपः स्वचिन्तनपरकः आन्तरिकज्ञानम्।[8] सामान्यज्ञानं विशेषज्ञानञ्च सर्वाणि प्रत्ययान्तर्भूतानि भवन्ति।[9] मनसि प्रवर्तमाना सर्वे प्रत्ययाः। काण्टमहोदयेन ज्ञानस्य सीमा निर्धारिता Critique of Pure Reason पुस्तकमाध्यमेन।

द्विविधं लक्ष्यं दर्शनस्य। सर्वादौ सहजातप्रत्ययवादखण्डनम्। द्वितीयमनुभववादप्रवर्तनम्। ननु सर्वे विषयाः आत्मनि तिष्ठन्ति तानि नीत्वा वयं आविर्भवामः। बाह्यपदार्थात् किमपि न जायते इति चेत्सहजातप्रत्ययाः सर्वस्मिन् ग्राह्याः तन्न, प्रमाणाभावादिति बोध्यम्। प्रत्येकेषु सहजातज्ञानम् ईश्वरप्रवृत्तं[10] विद्यते इति किमपि प्रत्यक्षं नास्ति। नानुमानादीनि प्रमाणान्तराणि साधयितुं संभवन्ति। ज्ञानक्षेत्रे भवतु उत कर्मक्षेत्रे सहजातं उभयत्र बाधते। न एकोपि नियमोऽस्ति यः सर्वत्र समभावेन मान्यः स्यात्। जाति-व्यक्ति-धर्म-निर्विशेषेण सर्वत्र भिन्नदर्शनं मिलति। यदि प्रत्ययः सहजातः स्यात्तर्हि सर्वत्र भिन्नदर्शनं किमु?[11]

ज्ञानमसंदिग्धम्। गणितेऽपि प्रसिद्धम्। वाक्याधारेण व्यक्तीभवति ज्ञानम्। वाक्यं तु भावनायाः प्रभवति। भावना कस्माद्भवति ? वक्ष्यमाणे प्रसंगद्वयम्।

1.कस्यापि व्यक्तिविशेषस्य चेतनांशः, यं ज्ञातुं कस्यापि वस्तुध्यानस्यावश्यकता नास्ति।

2.भावना यस्य कस्यापि वस्तुनः प्रतीकः प्रतिनिधिर्वा भवितुमर्हति। सहजातप्रत्ययसमर्थकाः अव्याघात Contradiction तादात्म्य Identity सिद्धान्तिनः भवन्ति।

सर्वे प्रत्ययाः बौद्धिकाः,नैतिकाः धार्मिकाश्च भवन्ति। कोऽपि आचारसिद्धान्तो नास्ति यो निखिलेपि संसारे सार्वभौमिकत्वेन सत्यं मन्यते। 'स्पर्टा' निवासिनः हत्याचौर्यादिकमपि धर्मो मन्यन्ते, सभ्या अपि युद्ध-दुराचारादीनि मान्यकर्माणि भजन्ते। एतस्माद् नैतिकधर्माणामपि असार्वभौमिकत्वात् न सहजाताः मान्याः।[12] अनेन सहजप्रत्ययवादो निराकृतः।

## अनुभववादस्य वैशिष्ट्यम्

ज्ञानस्य प्रामुख्यं वैशिष्ट्यं च सर्वमनुभवात्मकम्। बुद्धिवादिनो यत्र ज्ञानस्य अनिवार्यतां वर्णयन्ति, अनुभववादिनस्तत्र ज्ञानस्यार्थः प्रमाणयुक्तो मन्यन्ते। ज्ञानप्राप्तेः मूलमनुभव इति तेषां मतिः।[13] अनुभवो मूलम्। बुद्धिरुपादानसामग्री। सा बुद्धिर्नियामकरूपेण प्रवर्तति। यदानुभवेन संवेदनं जन्यते तदा बुद्धिः क्रियाशीला भवति। अन्ते निर्णयः समायाति।

ईश्वरविचारप्रसंगे लक् न मौनः। ईश्वरो ज्ञाताज्ञातो वा न निश्चीयते लक्। ईश्वरो ज्ञात इति असंदिधः। एतज्ज्ञानं प्रदर्शनात्मकं वा निर्देशनात्मकं स्यात्। तस्मिन् सर्वे गुणाः तिष्ठन्ति इति स्वात्मचिन्तनद्वारा प्रकाश्यन्ते। आत्मचिन्तनेन हि स्वाभीष्टं सिद्ध्यति। ईश्वरे सर्वे गुणा अपरिमिताः स्वीक्रियन्ते।[14]

## भाषाविश्लेषणम्

वाक्ये भावनाप्रवृत्तिर्निहिता मन्यतेऽत्र। वाक्यं भाषारूपेण भाषते। समाजस्य मनुष्याणां कृते भावविनिमयार्थं कापि भाषा निहिता। यया सः वार्तालापं करोति। भाषां विना एतन्न सम्भवति। समाजे व्यवहारार्थं संलापः आवश्यकः। सामाजिकबन्धननिमित्तमस्य परमं प्रयोजनमुक्तम्। अस्माकं ज्ञानं तर्कमाध्यमेन जायते। तानि वाक्यानि प्रत्ययेनैव संगठितानि भवन्ति। प्रत्ययाणां पारस्परिकसम्बन्धः तत्तत्प्रकाशकैः शब्दैः सह वर्तते। शब्दं विना भाषाज्ञानाभावात्। शब्दोऽत्र प्रत्ययः। तद् ग्राहकं मनः। अन्तःकरणे प्रत्ययाः। ते सरल-जटिलभेदेन द्विविधा। संवेदनीया आत्मचिन्तनपुरःसराः सरलाः। इमे सरलाः निश्चयात्मिकाः निरवयवाः अविश्लिष्टाः Unanalysable मन्यन्ते।[15] यदा मनः निष्क्रियरूपेण प्रत्ययाणां ग्रहणं विदधाति तदा सरला इत्युच्यन्ते। सरलप्रत्ययाणां रूपाणि अभिव्यज्यन्ते। रक्त-पीतादीनां शीतोष्णादीनां ज्ञानं तु साक्षादनुभवाज्जायते। यदा सरलाः प्राप्यन्ते तदानीं मनः सक्रियं सत् तानि असंख्येषु युनक्ति। सर्वे मिलित्वा जटिलाः भवन्ति। मिश्रीकरणमत्र मानसिकीप्रक्रिया विशेषा, न भिन्ना। अनेन संवेदनेन आत्मचिन्तनं भवति। तमान्तरीकं ज्ञानविशेषं एकैकेन संयोज्य जटिलप्रत्ययान् साधयन्ति।[16] संयोजन-वियोजन-तुलनाधारैश्च जटिलप्रत्ययाणां प्रयोगो अत्र त्रिधा विभज्यते। आदौ प्रकारभेदः। द्वितीये द्रव्यम्।

तृतीये च सम्बन्धः विचार्यते । प्रकारो यौगिकः सरलमिश्रणेन जायते । द्रव्यमालम्बनम् । सरलप्रत्ययाणाम् आश्रयदाता मन्यते । सम्बन्धः पारस्परिकः ।

**ज्ञानस्य स्वरूपं तस्य सीमानिर्धारणञ्च**

ज्ञानस्य स्वरूपनिर्णये तथा तस्य सीमानिर्धारणविषये लक् महोदयो विशेषो वक्ति । अभ्रान्तं खलु ज्ञानस्य लक्षणम् । भ्रम-प्रमादयुक्तं ज्ञानं कदापि ज्ञानपदवाच्यं न भवति। प्रत्ययाणां मध्ये संगत्यसंगतिसन्दर्शनं वास्तविकं ज्ञानस्वरूपम् । बोधो Understanding ज्ञानस्य प्राथमिकं कार्यम् । कदाचिन्मनः प्रत्ययस्य संगति-असंगतिदर्शनमपरोक्षात्करोति । कदाचित्परोक्षात्करोति । एतस्मात्लक् ज्ञानस्य विभागो द्विधा कथितः ।

(क) सहजोपलब्ध ज्ञानं वा प्रमाणनिरपेक्षज्ञानम् Intuitive Knowledge

(ख) सोपपत्तिकज्ञानं वा प्रमाणसापेक्षज्ञानम् Demonstrive Knowledge इति।[17] यथा चक्षुरिन्द्रियमालोकमपरोक्षभावेन ग्रहणं करोति तथैव मनः ज्ञानमपि अपरोक्षात् गृह्णाति । अत्र कस्यापि प्रमाणस्यावश्यकता नास्ति । श्वेतो न कृष्णः, कृष्णो न श्वेतः, उभयोर्मध्ये असंगतिः मनसा लभ्यते । अत्रापि किमपि प्रमाणस्य उपयोगिता चेन्न, प्रत्ययाणां मध्ये संगति-असंगतिगतभेदो योऽस्माभिः दृश्यते सः चतुष्प्रकारका उक्ताः । 1.अभिन्नता-विभिन्नताभेदः 2.सम्बन्धगतभेदः 3.सहावस्थितिजनितभेदः 4.वास्तवस्थितिजनितभेदश्च । आद्ये स्वकीयेन सह अभिन्नता तथा अन्येन सह विभिन्नता उक्ता । द्वितीयस्तार्किक-गाणितिक-वैज्ञानिकज्ञानानि सम्बन्धनिष्ठायुक्तानि भवन्ति । यदि कः=खः, खः=गः तस्मात् कः=गः इत्युपपन्नः । अयं दृष्टान्तः सम्बन्धनिष्ठज्ञानस्य । तृतीये सहावस्थिते द्रव्ये तन्निष्ठगुणाः विद्यन्ते । वास्तवस्थितौ 'अहं' प्रत्ययजनितज्ञानं सर्वत्र सिद्ध्यति । 'अहमस्मि' इत्यत्र मम उपस्थितिविषयकं सहजोपलब्धिज्ञानम् चतुर्थमुक्तम् ।[18]

**उपसंहारः-**

मानवज्ञानस्य सीमानिर्धारणं न सहजसाध्यम् । प्रत्ययाणां सीमा भवति अस्माकं ज्ञानराज्यस्य परिसीमा । प्रत्ययं विहाय वयं ज्ञानलाभकर्तुं न समर्थाः । सर्वेषां ज्ञानानां मूलं भवन्ति प्रत्ययसमूहाः । सम्बेदन-स्वचिन्तनाभ्यां प्रत्यया उपलभ्यन्ते । इन्द्रियानुभवस्य परिसीमा हि ज्ञानस्य परिसीमा इति उक्ता । यद् यदिन्द्रियानुभवशून्यं तत्तद् न ज्ञानपदवाच्यमिति । इन्द्रियानुभवस्य सीमितत्वात् ज्ञानस्य परिसीमापि सीमिता[19] इति लक् सिद्धान्तः स्पष्टः । ज्ञानं प्रत्ययेषु सीमितमिति तदुक्तिः । यस्य पदार्थस्य प्रत्ययो न भवति तस्य ज्ञानमसम्भवम् । लक् असंगतिरूपस्य आत्मन ईश्वरस्य च अस्तित्वं वास्तविकमसंदिग्धं मन्यते । अन्ततो गत्वा अस्मिन् लक् दर्शने तत्त्वविचारप्रक्रिया कदाचित् संशयरहिता अस्पष्टा चेति अनुमीयते। इत्यलं विस्तरेण ।

डा. प्रदीप्तकुमारनन्दः

उपाचार्यः, सर्वदर्शन-विभागमुख्यश्च

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,श्रीविहारः,पुरी

---

पादटीका

[1] पाश्चात्य दर्शन का इतिहास –फेंक थिली पृ-६५

[2] नव्य दर्शन विट्रिश ज्ञानालोक पृ-११५

[3] पाश्चात्यदर्शनेर इतिहास बेंगलि पृ-११४

[4] तत्रैव-पृ-११५

[5] नव्य दर्शन विट्रिश ज्ञानालोक पृ-११५

[6] परमतत्त्वमीमांसा—विद्याभूषण श्रीकृष्ण जोशी,पृ-८५

[7] मतिप्रशिक्षदर्शनशास्त्रम् पृ-८६

[8] पाश्चात्य दर्शन का इतिहास –फेंक थिली पृ ६७

[9] पाश्चात्यदर्शनेर इतिहास बेंगलि पृ-११५

[10] पाश्चात्य आधुनिकदर्शन पृ१३४

[11] तत्र पृ-११८

[12] तत्रैव पृ-१३५

[13] दृष्टि The Vision पृ-६४

[14] पाश्चात्य आधुनिक पृ१६५

[15] तत्र पृ-१५९

[16] तत्रैव पृ-१३८

[17] पाश्चात्य दर्शनर इतिहास-ृपृ-१८८

[18] तत्र-१८९

[19] पाश्चात्य आधुनिक दर्शन पृ-१३८

सहायकग्रन्थाः

१-पाश्चात्य आधुनिक दर्शन की समीक्षात्मक व्याख्या-या मसीह मोतिलाल बनारसीदास दिल्ली १९८८

२-पाश्चात्य दर्शनर इतिहास-प्रो० हृदानन्द राय odisha state bureau of text book Bhubaneswar1975

3-परमतत्त्वमीमांसा- विद्याभूषण श्रीकृष्णजोशी चौखम्बा विद्याभवन वाराणसी १९६५

४-पाश्चात्यदर्शन-चन्द्रधर शर्मा भार्गव बुक डिपो वनारस १९५४

५-पाश्चात्य दर्शन का इतिहास-संपादक प्रो० दयाकृष्ण राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर १९७९

६-पाश्चात्य दर्शन का इतिहास- फ्रेंक थिली सेण्ट्रल बुक डिपो इलाहावाद १९५४

७-पाश्चात्य दर्शन – गुलाव राय लक्ष्मीनारायण प्रेस वनारस १९७९

८-हिन्दु दर्शन ओ ख्रीष्टीय दर्शन, श्री परमानन्द दत्त आनन्द पालित रोड कलिकता १३३५ साल

९-पाश्चात्य दर्शनेर इतिहास, द्वितीयखण्ड श्रीतारक चन्द्र राय-गुरुदास चट्टोपाध्याय एण्ड सन्स-१९५२

१०-प्राच्य ओ पाश्चात्य दर्शनेर इतिहास, प्रथमखण्ड, द्वितीयभाग-योगीन्द्रनाथ समाद्दार-१३७२ साल

११- प्राच्य ओ पाश्चात्य दर्शनेर इतिहास, प्रथमखण्ड, प्रथमभाग-योगीन्द्रनाथ समाद्दार-१३७२ साल

१२.पाश्चात्य दर्शन का ऐतिहासिक सर्वेक्षणम्- डाः शोभा निगम